समासवादः

रचयिता
"न्यायपञ्चानन"
श्रीमान् जयरामः

प्रधानसम्पादकः
आचार्य श्रीपाद सुब्रह्मण्यः
सञ्चालकः

सम्पादकः
आचार्य आर्.वि.रामकृष्णशास्त्री

आन्ध्रप्रदेश प्रभुत्व प्राच्यलिखित ग्रन्थालयः
परिशोधनालयश्च, हैदराबाद्
२०१२

समासवादः

रचयिता

“न्यायपञ्चानन”

श्रीमान् जयरामः

प्रधानसम्पादकः

आचार्य श्रीपाद सुब्रह्मण्यः

सञ्चालकः

सम्पादकः

आचार्य रेमिल्ल वेङ्कट रामकृष्णशास्त्री

आन्ध्रप्रदेश प्रभुत्व प्राच्यलिखित ग्रन्थालयः

परिशोधनालयश्च, हैदराबाद्

2012

Samasavada

by
Nyaya Panchanana
Sriman Jayarama

Chief Editor:
Prof. Sripada Subrahmanyam

Editor:
Prof. R.V.Ramakrishna Sastry

ISBN No. : 978-93-80379-20-3

Publication No. : 87

First Edition	:	2012
No. of Copies	:	500
Price	:	**Rs. 30/-**

© APGOML & RI

Published by:
A.P.Govt. Oriental Manuscripts
Library and Research Institute,
Behind O.U. Police Station,
Osmania University Campus,
Hyderabad - 500 007.
Phone : 040-27097709.

Printed at:
Mandakini Printers, Ramnagar, Hyde-20.

विषयानुक्रमः

	प्रस्तावना	...	V
1.	समासलक्षणम्	...	1
2.	कर्मधारयसमासलक्षणम्	...	3
3.	द्विगुसमासलक्षणम्	...	8
4.	तत्पुरुषसमासलक्षणम्	...	10
5.	बहुव्रीहि समासलक्षणम्	...	15
6.	द्वन्द्वसमासलक्षणम्	...	18
7.	अव्ययीभावसमासलक्षणम्	...	22

प्रस्तावना

भारतीयसंस्कृतिपरिरक्षणे मूलभूताः अत्यन्तं प्रधानभूताश्च प्राचीनतालपत्रग्रन्थाः, प्राचीन हस्तलिखितग्रन्थाश्च इत्यत्र न कोऽपि संशयः। ऋषिकल्पाः निस्स्वार्थमनस्काश्च अस्माकं पूर्वकालिकाः पञ्चशतवर्षेभ्यः प्रागेव अस्माकं प्राचीनसंस्कृतिः भाविकालिकानां कृते दर्शनीया, प्रदेया चेति सङ्कल्पं कृतवन्तः, योऽयं प्रयत्नः इदानीमस्माभिः परिदृश्यमानः हस्तलिखितग्रन्थरूपः। काव्य शास्त्र वैद्य वैदिक वैज्ञानिक रङ्गेषु वर्तमानाः बहवः ग्रन्थाः प्रथमतः अस्माकं हस्तलिखितग्रन्थरूपेणैव अलभन्त। मुद्रणसौकर्यरहिते पूर्वकाले गुरुपरम्परया वंशपारम्पर्येण वा ज्ञातान् विषयान् पत्रस्थं कर्तुं अस्माकं पूर्वजाः महायत्नमकुर्वन्। तस्मिन् प्रयत्ने कृतकृत्यैस्तैः अस्माकं कृते ज्ञानभिक्षा प्रदत्ता इत्यत्र न कापि अतिशयोक्तिः। तेषां महात्मनां लेशतो वा ऋणापगमनाय अस्माकं सर्वेषामपि कर्तव्यमिदं वर्तते यत् तेषां हस्तलिखितग्रन्थानां समुचितरूपेण परिरक्षणं, तेषु ग्रन्थेषु निक्षिप्तामूल्यविषयज्ञानसमुपार्जनञ्च। तेषां हस्तलिखितग्रन्थानामध्ययने अधुनातनकाले देशविदेशीयाः समग्रं परिशोधनं कुर्वन्ति।

"आन्ध्रप्रदेशप्रभुत्वप्राच्यलिखितग्रन्थालयः, परिशोधनालयश्चे"तिनाम्नी इयं संस्था आन्ध्रप्रदेशप्रभुत्वसर्वकरेण 1975 संवत्सरे राष्ट्रराजधान्यां भाग्यनगर्यां स्थापिता। तेलुगु, संस्कृतम्, उर्दू, अरबिक्, पर्षियन् इत्यादिभाषासु सप्तविंशति सहस्राधिकाः हस्तलिखितग्रन्थाः अस्यां संस्थायां विराजन्ते। आधुनिकरीतिषु एते ग्रन्थाः सुरक्षिता वर्तन्ते अस्यां संस्थायाम्। देशविदेशीयाः प्रतिदिनं एतां संस्थां प्रति आगत्य परिशोधनमपि कुर्वन्ति। राष्ट्रिय पाण्डुलिपिग्रन्थ संस्थायाः (National Mission for Manuscripts, New Delhi) सहकारेण आन्ध्रप्रदेशराष्ट्रे सर्वत्र विद्यमानानां हस्तलिखितग्रन्थानां सर्वेक्षणकार्यक्रमोऽपि स्वीकृतः अनया संस्थया। एतस्याः

संस्थयाः प्रधानलक्ष्येषु अन्यतमं हस्तलिखितग्रन्थानां मुद्रापणं राष्ट्रप्रभुत्वार्थिकसाहाय्येन अनया संस्थया स्वीकृतं वर्तते।

<u>प्रस्तुत ग्रन्थः</u>

न्यायपञ्चानन श्रीमद्जयरामपण्डितविरचितोऽयं समासवादनामकोऽयं हस्तलिखितलघुग्रन्थः संस्कृतव्याकरणविषये अस्माकं संस्थायां विराजते। ग्रन्थादौ श्रीमान् जयरामः "समासतत्त्वमाचष्टे विबुधानां सुधोपमम्" इति प्रतिज्ञां कृतवान्। सामान्यतः समासलक्षणं, द्विगुद्वन्द्वादिसमासानां विशेषलक्षणानि, राजपुरुषादिसमासानां शाब्दबोधप्रक्रिया इत्यादयः बहवो विषयाः ग्रन्थेऽस्मिन् दरीदृश्यन्ते। शास्त्रचर्चा अपि तत्र तत्र दृश्यन्ते इति अपरोऽयं विशेषः अस्य ग्रन्थस्य। अतोऽयं ग्रन्थः विदुषां, विमर्शकानां, परिशोधकानाञ्च अत्यन्तम् उपयुज्यत इति निश्चप्रचम्।

एतद्ग्रन्थावलोकनेन इदमवगम्यते यत् श्रीमता जयराममहोदयेन विरचितोऽयं ग्रन्थः श्रीविकृतिनाम संवत्सरकार्तिकपौर्णमस्यां बुधवासरे श्रीमता वज्झल बुच्चन्नशास्त्रिणा आन्ध्रलिप्यां विलिख्य श्री बोम्मगण्टि नृसिंहशास्त्रिभ्यः श्रीरामार्पणबुद्ध्या समर्पितः इति। संस्कृतविदुषां, प्रधानतः वैयाकरणानामयं ग्रन्थः अत्यन्तमुपकरोतीति वयं विश्वसिमः। हस्तलिखितग्रन्थस्य शुद्धप्रतिकरणम् अतीव कष्टसाध्यम्। तत्र बहवः लेखकप्रमादा अपि वर्तन्ते। तान् दूरीकर्तुं सम्पादकैः अस्माभिश्च महान् यत्नः कृतः। यत्र तु सन्दिग्धमेव वर्तते तत्र मूलप्रतौ यथा वर्तते तथैव स्वीकृतम्। तन्निश्चये विद्वांस एव प्रमाणम्। ग्रन्थस्यास्य सम्पादकत्वभारं स्वीकृतवतां व्याकरणविदुषामाचार्याणां रेमिल्ल वेङ्कटरामकृष्णशास्त्रि महाभागानां कृतज्ञतापूर्वकनमस्कारान् विदध्महे।

सञ्चालकः

श्रीपाद सुब्रह्मण्यः

समासवादः

श्री गणाधिपतये नमः

न्यायपञ्चानन श्रीमान् जयराम स्समाहितः।

समासतत्त्वमाचष्टे विबुधानां सुधोपमम् ।।

समासलक्षणम्

तत्र समासत्वं विभक्तिशून्य पूर्वपदक नामसमुदायत्वम्। दधि मधुरमस्तीत्यादौ भावनान्वये प्रथमान्तपदोपस्थितेः प्रयोजकत्वेन लुप्तविभक्तेस्स-त्वाददोषः। नीलोत्पलमित्यादिसमासे तु विभक्तिर्व्यर्था। न वा राजपुरुष इत्यादौ लुप्तषष्ठ्यादि स्मृत्या शाब्दबोधः। षष्ठी लोपमजानतोऽपि बोधात्। न वा बहुव्रीहिः। यत्पदगर्भ विग्रहवाक्यस्मृत्या बोधः। तत्पदाभावात्। किं चैवं तत्पुरुषादितः कर्मधारयस्य ज्यायस्त्वं न स्यात्। लुप्तषष्ठ्यादि स्मरणाङ्गीकारे लक्षणाविरहात्। समासादौ विभक्तिलोपविधानं तु विभक्तिं विनापि साधुत्वज्ञापनाय। नीलोत्पलं धवखदिरावित्यादि समुदायोत्तरं विभक्तिस्त्वर्थवदादिसूत्रे अर्थवत्त्वस्य स्वघटकपदवृत्त्या अर्थबोधकत्वरूपत्वात्।

अत्र विभक्तिशून्य-पूर्वपदकत्वं विभक्तिशून्यपूर्वपदघटित शाब्दबोध प्रयोजकानुपूर्विमत्वम्। तेन न घट इत्यादौ नातिव्याप्तिः। घटो नेत्यानुपूर्वि-ज्ञानत्वेनैव शाब्दबोधहेतुत्वात्। अघट इत्यादि समासतापन्नस्य नञस्तु

पूर्ववृत्तित्वेनैव शाब्दबोधप्रयोजकत्वम्, समासानुशासनबलात् अघट इत्यादे रबोधकत्वात्। श्रुतेरिवार्थं स्मृतिरन्वगच्छदित्यादौ श्रुतेरर्थं स्मृतिरिवेति योजनयैव बोधः। तेन इवार्थमित्यादौ नातिव्याप्तिः। 'आराद् ब्रह्मविदामशेषविषय ब्रह्मैक्यमुद्दीपय' इत्यादौ आरात् समुज्जृम्भत इत्यादि योजनयैव बोधः। तेनाराद्ब्रह्म इत्यादौ नातिव्याप्तिः।

नामसमुदायत्वं चाव्याहतम्। अत एव वाक्यं समासतां प्राप्नोति। अनित्य एव समासः। कण्ठेकाल उरसि लोम इत्यादिकमपि समासप्रकृत्यन्तरमेवेत्येके। तन्न, कण्ठेकाल उरसिलोम इत्यादौ समासप्रकृत्यन्तरत्वं समुदायशक्तिमङ्गीकृत्य न वा आद्ये गौरवं नामसमुदायत्वं च व्याहतम्। अत एव नान्त्यः, प्रातिपदिकत्वस्य अर्थबोधकत्वस्य चानुपपत्तेः। एकान्तकण्ठ इति शब्दस्य क्वाप्यनुपलब्धेः। तस्माद्वाक्यमेव क्वचिद्विकल्पेन क्वचिन्नित्यमेव समासतामाप्नोति। सविभक्तिकनामस-मुदायस्यैव समासत्वम्। न च देवान् इत्यादिसमुदायस्यापि वारणाय अर्थवादादिसूत्रे अप्रत्यय इत्यस्य प्रत्यय तदन्तान्यपरत्वेऽपि प्रत्ययपदस्य विभक्तिपरतया कृत्तद्धितान्तयोरस्तु संग्रहः।

नीलोत्पलमित्यादिसमासस्य लुप्तविभक्त्यन्तस्य प्रातिपदिकत्वं कृदादिसूत्रेणैव विधेयमिति तत्सूत्रस्य अर्थवदादिसूत्रस्य प्रपञ्चत्वं मिश्राद्युक्तं विरुध्येत इति वाच्यम्, इष्टत्वात्। अप्रत्यय इत्यस्य कृत्तध्दितसमासेतरप्रत्ययान्त-भिन्नपरत्वज्ञापकतया कृदादिसूत्रस्य प्रपञ्चत्वसंभव इत्यन्ये।

ननु एतन्मते प्रागुक्त लक्षणमसंभवतीति चेन्न, आनुशासनिक लोपाभाव विशिष्टान्यत्वस्य नियतानुसंधानविषयत्वस्य च विभक्ति - विशेषत्वात् कण्ठेकाल इत्यादौ विभक्तिर्नानुशासनिक लोपाभावविशिष्टान्या, नीलोत्पलमित्यादौ विभक्ति र्न नियतानुसंधानविषया साधुत्वमात्रार्थकत्वादित्यदोषः।

परे तु लुक्समासातिरिक्तसमासे विभक्तेरसत्वादन्त्यविशेषणं न देयमित्याहुः। सङ्केतविशेषसंबन्धेन समासपदवत्वमेव समासत्वमित्यपरे। विभक्त्यन्त विभक्तिमन्नामसमुदाय इति तु यथा नीलदण्डेत्याद्यनुकरणसाधारण मित्यास्तां विस्तरः।।

तत्र समासाः षट्। कर्मधारय-द्विगु-तत्पुरुष-बहुव्रीहि द्वन्द्वाऽव्ययीभाव भेदात्।

कर्मधारयसमासलक्षणम्

कर्मधारयत्वं च समासप्रयुक्त लक्षणाशून्यतुल्याधिकरण-नामद्वयघटितसमासत्वम्। नीलोत्पलमित्यादौ नीलपदे निरूढ लक्षणाया स्समासप्रयुक्ततया नीलोत्पलपदयोस्तुल्याधिकरणत्वाच्च लक्षणसङ्गतिः। चित्रगुः राजपुरुष इत्यादौ समासप्रयुक्त लक्षणासत्वा न्नीलोत्पलयोरभेदः। कण्ठेकाल इत्यादौ तुल्याधिकरण पदद्वयाभावान्नातिव्याप्तिः। तुल्याधिकरणत्वस्य अभेदसंसर्गक बोधतात्पर्यकत्वस्य नीलघटयोरित्यादावदोषात् नीलस्य अभेदेन घटान्वितत्वेपि षष्ठ्यर्थेऽन्वयासंभवात्। अभेद इत्यस्य च निराकाङ्क्षितत्त्वाच्च। अस्ति

चेदं नीलोत्पलं कृष्णसर्प इत्यादौ, नीलपदस्य नीलवदादि-लाक्षणिकतयाऽभेदबोधात्।

अत्र वाक्यमेव समासतामाप्नोतीति मते नीलोत्पलमित्यादयो विकल्पसमासाः। नीलमुत्पलमित्यादि विग्रहसत्त्वात्। कृष्णसर्पः कुम्भकार उपकुम्भमित्यादयो नित्यसमासाः। अविग्रहोऽस्वपदविग्रहो वा नित्यसमास इत्यभियुक्तस्मरणात्। अस्वपदविग्रह इत्यस्य स्वघटक यावत्पद घटित विग्रहकान्य इत्यर्थात्। चित्रा गौ र्यस्येति चित्रगु रित्यधिकस्य यस्येतिभागस्य निवेशेऽपि स्वघटक यावत्पदघटितत्वसत्त्वात् बहुव्रीहि नित्यसमासत्वव्युदासः।

प्राञ्चस्तु बहुव्रीहेरपि नित्यसमासत्व मङ्गीकुर्वन्ति। तन्मते अस्वपदेत्यस्य स्वघटकपदभिन्नपदघटितेत्यर्थ इति ध्येयम्। क्वचिदसमासो यथा-रामो जामदग्न्यः, अर्जुनः कार्तवीर्यः, उत्पलं नीलमित्यादाविति बोध्यम्। छिन्नप्ररूढो वृक्ष इत्यादौ छिदेरारम्भक संयोग विरोधिविभागजनकक्रियाऽर्थः। क्तप्रत्ययस्य फलाश्रयो, वृक्षपदस्य तदवयवोऽर्थः। विभागस्य उभयकर्मजत्वे अवयवद्वयस्यैव पदसमवेत क्रियाजन्य फलशालित्वात्कर्मत्वम्, अन्यतर कर्मजत्वे निश्चलावयवस्यैवेति बोध्यम्। तादृशक्रियानुकूलदात्रादि व्यापारश्छिदेरर्थः। धात्वर्थतावच्छेदक क्रियाशालितया च न क्रियावयवस्यैव कर्मत्वमित्यन्ये। प्रोपहितरुहेः वृक्षाद्युत्पत्तिः, क्तप्रत्ययस्याश्रयोऽर्थः। कृष्टमधिकृत मित्यत्र कृषेर्विलेखनं मृदवयवविभागहेतु क्रियादि जनक लाङ्गलादि व्यापारोऽर्थः। कृष विलेखने इत्यनुशासनात्। क्तप्रत्ययस्य फलाश्रयः। यदि काष्ठविशेषनिर्मितामयीख्यातौ तथा

कृतस्तद्व्यापाराधीन संयोगाश्रयः कृञो व्यापारार्थत्वात् तथा च तादृशलाङ्गलादि व्यापारजन्य फलाश्रयो भिन्नो यदि व्यापाराधीन संयोगाश्रयः इति वाक्यार्थः। तत्रादौ छिन्नः पश्चात्प्ररूढ इत्यादिक्रमो विवक्षितः। 'आदिकर्मणि क्त' इत्यनुशासनात्। तेन प्ररोहोत्तरं भेदनमात्रेणैव तथा प्रयोग इति बोध्यम्। मुखं चन्द्र इत्यत्र चन्द्रपदस्य आह्लादकरत्ववति सारोपलक्षणायां तुल्याऽधिकरणत्वात् कर्मधारयः।

नन्विदमयुक्तम्। 'आह्लादयति मुखेन्दु-र्जगदिदमतुलद्युति स्सुतनो' रित्यादाविन्दुपदेन आह्लादकत्वोक्तौ पौनरुक्त्यापत्तेः। न च नात्र सारोपलक्षणया रूपकम्। मयूरव्यंसकादि समासोपगमे..... इन्दुरिव मुखमित्युपमित-समासोऽस्त्विति वाच्यम्। 'उपमितं व्याघ्रादिभिस्सामान्याप्रयोगे'(अष्टा.2-1-56) इत्यनुशासनात् सामान्यधर्माऽप्रयोग एव तत्समासात्। आलङ्कारिकैरपि सामान्यधर्मप्रयोगे सति उपमाबोधकत्वात् सारोपलक्षणाप्रयुक्तो रूपकालंकार इत्युच्यते। उपमितसमासे धर्मवाचकोभय लुप्तोपमैव वा तैरुदाहृता। न तु वाचकमात्रलुप्तोपमा।

किं चैवं 'पादाम्बुजं भवतु वो विजयाय मञ्जुमञ्जीरसिञ्जित मनोहर मम्बिकाया' इत्यादौ पूर्वपदार्थ प्रधान व्याघ्रादिसमासेनोपमा। मञ्जीरसिञ्जितस्य पाद एव संभवात्। 'यस्यानिशं दिविषदश्चरणारविन्द मुत्तंसयन्त्यमितभक्ति-भरावनम्रा' इत्यादौ उत्तरपदार्थप्रधान मयूरव्यंसकादिसमासेन रूपकमेव, उत्तंसनस्य अरविन्द एव संभवादिति व्यवस्था सर्वैरङ्गीकृता न संभवति। तथासत्यरविन्दादिपदार्थस्य आरुण्यादि गुणविशिष्टस्य प्राधान्यायोग्यत्वेन मयूरव्यंसकादि समासेऽपि

व्याघ्रादिसमास इव पूर्वपदार्थ – गोचरणस्यैव प्राधान्यापत्त्या उत्तंसनानुगुण्यस्य विरहतौल्यापत्तेः। गुणजोऽपि विशिष्टयोगार्थात् विशिष्टप्राधान्यस्य नीलोत्पलादौ व्यवस्थितेः। उत्तरपदार्थप्राधान्येऽपि अरविन्दत्वजातेरिव चरणवृत्त्यारुण्यादिगुणस्य उत्तंसनानुगुणत्वाभावच्च उत्तंसनपदस्य सोत्कण्ठश्रवणे साध्यवसान लक्षणास्वीकारात् सुतरां .... चेन्मैवम्। इन्द्वादिपदस्य इन्द्वादिवृत्तित्वेन तद्धर्मवति लक्षणायां पौनरुक्त्यायोगात् धर्मत्वेन ..... धर्मस्यैव लब्धेः। अन्यथा चन्द्रवन्मुख माह्लादयतीत्यादावपि पौनरुक्त्यापत्तेः।

किञ्चेत्यादिकमपि मन्दम्, योगरूढिभ्यामिव लक्षणाव्यञ्जनाभ्यां चरणारविन्दमित्यादितः चरणाभिन्न-मरविन्दवृत्तिधर्मवदरविन्द-मित्याकारकबोध एव पर्यावसानात्। 'कस्त्वं बोधयामि' 'मथ्नामि कौरवशतम्' इत्यादौ व्यङ्ग्यार्थमादायैव बोधविश्रमात्, व्यञ्जनाऽनङ्गीकर्तॄणां मते तु जातिविशिष्टप्राधा-न्यनियमात्। पादाभिन्नमम्बुजसदृशं चरणाभिन्न मरविन्दवृत्तिधर्मवदित्युभयत्र बोधः। उत्तंसपदस्य सोत्कण्ठश्रवणे लक्षणायां लक्ष्यार्थस्य मुख्यार्थाभेदाध्यवसायविरहस्य च स्वीकारान्न दोषः। अभेदाध्यवसायस्तु मानस एवेति तत्तदलङ्कारव्यपदेशः।

उभृङ्गलास्तु मुखचन्द्र इत्यादौ चन्द्रादिपदेन लक्षणारसविशेष वासनाजन्यबोधे वादधियो विरोधित्वाभावाच्च शाब्दधीः। तुल्याधिकरणत्वं च अभेदबोधकत्वात् वाक्याऽप्रामाण्यं चेष्टमित्याहुः। अब्राह्मणो असुरो अघट इत्यादौ नञः क्रमेण सदृशविरोधभिन्नश्चार्थः। सर्वत्र ब्रह्मणादिपदस्य

ब्राह्मणादिप्रतियोगिकोऽर्थः। ब्राह्मणादि प्रतियोगिकाभिन्न सादृश्यादेराश्रयो वाक्यार्थः। ब्रह्मणसदृशः सुरविरोधी घटान्य इत्यादौ पदार्थैकदेशेऽपि अन्वयस्य व्युत्पन्नत्वात्। अस्तु वा ब्राह्मणपदस्य सादृश्यादिसंबन्धेन ब्राह्मणसंबन्ध्यर्थः। ब्राह्मणसंबन्ध्यभिन्नः सदृशादिर्वाक्यार्थः। एतेनैकदेशे अभेदबोधकत्वेन तुल्याधिकरणत्वे चित्रगु रित्यादौ गोपदलक्ष्य गोस्वामिन एकदेशे गवि चित्राभेदान्वय इति मते तत्रापि तुल्याधिकरणत्वं स्यादित्यपास्तम्।

शाब्दिकास्तु अब्राह्मण इत्यादेरारोपितब्राह्मण इत्यादिरर्थः। ब्राह्मणभिन्नादिस्तु फलितार्थः। सर्वनामकार्यायोत्तरपदार्थप्राधान्यात्। अन्यथा अतिसर्व मित्यादाविव अतस्मिन् इत्यादौ सर्वनामकार्यं न स्यादित्याहुः। एतन्मते ब्राह्मणपदस्य ब्राह्मणारोपविषये लक्षणा। नञ्पदं तात्पर्यग्राहकमिति बोध्यम्। न च व्याघ्रादिसमासे पुरुषव्याघ्र इत्यादावब्राह्मण इत्यादौ, शस्त्रीव श्यामा शस्त्रीश्यामा, घन इव श्यामो घनश्याम इत्यादौ च समासप्रयुक्त लक्षणाव्याप्य समासविभाजकोपाधिशून्यत्वस्य वाच्यत्वात्। कण्ठेकाल इत्यादौ निर्मक्षिक मित्यादौ च लक्षणाविरहेऽपि न क्षतिः। बहुव्रीह्यव्ययीभावयो स्तुल्याधिकरणत्वा-भावादनतिप्रसङ्गात्। यदि च अतिसर्व इत्यादि तत्पुरुषेपि न लक्षणा तदा कर्मधारय व्यवहारविषयत्वमेव। राज्ञः पुरुष इत्यादिविग्रहे तुल्याधिकरणपद-द्वयविरहान्नातिव्याप्तिः। विग्रहसामान्यताश्रययोरतुल्याधिकरणत्वं तदुभयभिन्न पदद्वयघटितसमासत्वं वा तत्त्वम्। एतेन कृष्णसर्प इत्यादौ विग्रहसत्वेऽपि

नाव्याप्तिः। न च शस्त्रीश्यामा इत्यादावव्याप्तिः। स्वपदविग्रहस्यैव विग्रहत्वेन निर्देशादिति। शस्त्री चासौ श्यामा चेत्येवात्र विग्रहवाक्यमित्यन्ये इत्याहुः।।

द्विगुसमासलक्षणम्

संख्याविषयान्यत्वे सति संख्यावाचकपूर्वपदकतुल्याधिकरणं समासो द्विगुः। सत्यन्तोपादानात् पञ्चाम्राः पञ्चकन्याः इत्यादि कर्मधारयव्युदासः। पञ्चानामाम्राणां समाहार इत्यर्थे तु पञ्चाम्रमिति द्विगुरेव। तथा पञ्चकन्या इत्यपि। नीलोत्पलमित्यादे व्युदासाय संख्येत्यादि। पञ्चभर्तेत्यादिव्युदासाय तुल्याधिकरणेति। विग्रहे तुल्याधिकरणत्वाभावात् पञ्चभर्तेत्यादिव्युदासः। अयं च कर्मधारयबाधको अपत्यौणादिकभिन्नस्वरादि तद्धिताभिधेये तद्धितसामान्यस्यैव चार्थे विषये पदे तदुत्तरपदे समाहारे चाभिधेये विधीयते।

तद्धितार्थेऽभिधेये यथा-पञ्चसु कपालेषु संस्कृतः पञ्चकपलः ओदन इत्यादि। अत्र समासस्य संस्कृतोऽर्थः। कपालस्यैव वा कपालसंस्कृतोऽर्थः। तत्र व्युत्पत्तिवैचित्र्यात् एककपाले पञ्चाभेदसत्वात्। पञ्चाभिन्नकपलसंस्कृत इति शाब्दधीः। तद्धितार्थस्य समासादिना अभिधानात् उक्तार्थत्वान्न तद्धितप्रत्ययः।

तद्धितार्थविषये यथा- पञ्चसु ब्राह्मणेषु साधुः पञ्चब्राह्मण्यः। पञ्चानां गर्गाणां भूतपूर्वा गौः पञ्चगर्गरूप्यः। पञ्चानां नापितानामपत्यं पञ्चनापीति। द्वाभ्यां नौभ्यां क्रियते द्विनाविक इत्यादि। अत्र समासेन तद्धितार्थऽनभिधानात् तद्धितप्रत्ययः। तत्रसाधुरिति यत् (अष्ट.4-4-98) अपत्यार्थे इञ् (अष्ट.) भूतपूर्व

रूप्यः(अष्ट.5-3-54) क्रियत (अष्ट.4-1-95) इति ठक्। प्रश्नब्राह्मण निरूपितसाधुत्ववान्, पञ्चगर्गातीतस्वत्ववान्, पञ्चनापितापत्यम्, द्विनौक्रियत इत्यन्वर्थ .....।

उत्तरपदे यथा- पञ्चगवधन इत्यादयः। अत्र पञ्च गावो धनमस्येति बहुव्रीहौ अवान्तर/अन्तरवृत्ति द्विगुमाश्रित्य (राजादित्यतो (अष्ट.5-4-91) गोरतेति (अष्ट.5-4-92) टच् प्रत्ययः। समुदायस्तु बहुव्रीहिः। पञ्चगवाभिन्नधनसंबन्धीत्यन्वयधीः।

समाहारे यथा- पञ्चानां गवां समाहारः पञ्चगवम्। चतुर्णां पथां समाहारः चतुष्पथम्। पञ्चानां पूलानां समाहारः पञ्चपूली। अत्र पात्रादिभिन्नाऽदन्त-द्विगुत्वात् ङीप् प्रत्ययः। तदुक्तम्-

अपात्रादिरदन्तोऽयं स्त्र्यदन्तो वा द्विगुस्तथा।

अन्नन्तश्च समाहारो नदादिषु निगद्यते।। इति।

पत्रादेस्तु नपुंसकत्वमेव। द्विपात्रम्, त्रिभुवनम्, चतुर्युगम् इत्यादि। अदन्तस्यान्नन्तस्य द्विगोर्वैकल्पिकम् नदादित्वं यथा- पञ्चखट्वी, पञ्चखट्वम्। पञ्चतक्षी, पञ्चतक्षम् इत्यादि। अत्र समाहारः समासशक्त्या पूलादिपदस्यैव वा पूलादिसमाहारो लक्षणयार्थः। एकदेशेपि पूलादौ पञ्चादेरभेदान्वयो व्युत्पत्तिवैचित्र्यात् समाहारो बुद्धिविशेषविषयत्वं तथा च पञ्चाभिन्नपूलादि समाहारः। समाहारविशिष्टाः पञ्चाभिन्नपूलादय इत्यन्वयधी रित्यग्रे विवेचयिष्यते।।

तत्पुरुषसमासलक्षणम् -

अत्रसमासप्रयुक्त लक्षणाशून्योत्तर नामपदकत्वे सति लुप्तद्वितीयादि-विभक्तिक- पूर्वनामपदक- समासत्वं तत्पुरुषत्वम्। पञ्चपूलीत्यादिवारणाय सत्यन्तं, नीलोत्पलमित्यादिवारणाय लुप्तेत्यादि। न चानयो स्तत्पुरुषत्व मिष्टं, मुख्यतत्पुरुषस्याऽभावात्। तत्पुरुषसंज्ञा-विधानं तु अब्राह्मण इत्यादौ नकारलोपाद्यर्थे गौणम्। अब्राह्मणमित्यादि वारणाय पूर्वेत्यादि। तेन च न विवादो अविवाद इत्यादावव्याप्तिः। विरोध्यर्थकनञो असुर इत्यादाविव अविवादोऽनुपपत्तिरित्यादौ कर्मधारयस्वीकारेण मुख्यतत्पुरुषत्वाऽनङ्गीकारात्। न च नञः अव्ययत्वेन तेन अव्ययीभाव एव युक्तः। यथा निरो गताद्यर्थे इत्यनुशासनात् निरो निर्गमबोधकत्वेन निष्कौशाम्बि रित्यादौ तत्पुरुषो ऽत्यन्ताभावतद्वतोः बोधकत्वेन निर्मक्षिकं निर्विन्ध्य मित्यादौ अव्ययीभावः, तथा नञोऽत्यन्ताभाव तद्वतो बोधकत्वे एव अव्ययीभावो; अविवादमित्यत्र अघटं भूतलमिति नञः दीधित्युक्तेश्च अत्यन्ताभावतद्वदन्यस्य बोधकत्वे तु कर्मधारयो, असुरो अब्राह्मणो अविवाद इत्यादाविवेत्यदोषात्। अत्यन्ताभावार्थक नञा विकल्पेन कर्मधारय इत्यन्ये।

वस्तुतस्तु तत्पुरुष परिभाषाविषयत्वं तत्पुरुषत्वम् बोध्यम्। एतेन अर्धपिप्पलीत्यादौ उत्तरपदे समासप्रयुक्त लक्षणासत्वात् अवादयः कृष्टाद्यर्थे तृतीयया, पर्यादयो ग्लानाद्यर्थे चतुर्थ्या, प्रादयो गताद्यर्थे प्रथमया इत्याद्यनुशासनात्। अवकृष्टः कोकिलया अवकोकिलः, परिग्लानो अध्ययनाय

पर्यध्ययनः, प्रगत आचार्यः प्राचार्य इत्यादौ लुप्तद्वितीयादिविभक्तिपूर्वकत्वाभावादव्याप्तिरित्यपास्तम्। एषु तत्पुरुषत्वं गौणमित्यन्ये। राजपुरुष इत्यादौ च राजादिपदे राजसंबन्धिनि, ग्रामादिपदे च ग्रामादिकर्मकादौ लक्षणा। राजसंबन्ध्यभिन्नः पुरुषः, ग्रामकर्मकाभिन्नगमनाश्रय इति अन्वयधीः। शोभनराजपुरुष इत्यादौ च राजपदे शोभनराजसंबन्धिनि लक्षणा। शोभनपदं तात्पर्यग्राहकम्। नातो राजपदस्य राजसंबन्धिनि लक्षणायामेकदेशे राज्ञि शोभनान्वयानुपपत्तिः। अत्रैकदेशेष्वभेदान्वयः। चित्रगुरित्यादाविव व्युत्पत्ति वैचित्र्यात् इत्यन्ये। एतेन राजपुरुषो ग्रामो गमनमित्यादौ अन्वयाबोधात् नामार्थयोः नामार्थधात्वर्थयोश्च भेदेनान्वयस्याऽव्युत्पन्नतया राजादे स्सत्वादिसंबन्धेन पुरुषादौ ग्रामादेश्च कर्तृत्वादिसंबन्धेन गमनादावन्वयाऽसंभवात् राजपुरुषादि समुदायस्य राजसंबन्धवत्पुरुषादौ शक्तिः, इत्थं च राज्ञः पुरुष इति विग्रह समासार्थतापीत्यपास्तम्।

किञ्चैवं निषादस्थपतिं याजयेदित्यत्र निषादानां स्थपति रिति न षष्ठीसमासः, लक्षणासत्वात्। किन्तु कर्मधारयः। तत्र लक्षणाविरहादिति सिद्धान्तोप्याहन्येत। इतरमते षष्ठीसमासे लक्षणाभावात्। अथ शक्तितत्ज्ञानहेतुतयोरिव लक्षणा तत्ज्ञानहेतुतयोरपि क्लृप्तत्वात्। षष्ठीसमासात्मक एव युक्तः। तथा सति निषादानां स्थपतेर्लब्धविद्यात्रैवर्णिकस्य याजनसंभवे निषादस्य नाऽपूर्वविद्याप्रयुक्तिकल्पनं, न वा 'स्त्रीशूद्रौ नाधीयाताम्' इति निषेधसंकोचं लाघवाभावे वेदस्य मुख्यत्वसंभवेन गौणत्वमिति चेत्, वेदे कर्मधारयसंभवेन अन्यसमास इति षष्ठीसमासे शक्तावपि न सिद्धान्तव्याघात इति चेन्न, वैदिकशाब्दबोधस्य

शक्तिज्ञानमूलकत्वे लाघवस्य सिद्धान्तबीजत्वात्। शक्यसंबन्धज्ञानस्य विना शक्तिज्ञानासंभवात् केषांचिच्छक्यसंबन्धज्ञानादपि शाब्दबोध इति चेत्, अस्तु, तथापि न्यायनिर्णीततात्पर्यकाणां लक्षणाज्ञान-कल्पनस्य लाघवस्य निष्प्रत्यूहत्वात्। इत्थं च लाघवात्कर्मधारयप्रवृत्ता वपूर्वविद्याप्रयुक्ति कल्पना गौरवं फलमुखत्वा न्न दोषाय। 'स्त्रीशूद्रौ नाऽधीयाताम्' इत्यत्र अधिपूर्वक इङ्गातो र्निषादीय तत्तदध्ययनेतराध्ययनपरत्वं न शूद्रपदस्य निषादेतरशूद्रपरत्वं निषादस्य वेदान्तराध्ययन प्रसङ्गादिति बोध्यम्।

पुरुषोत्तम इत्यत्रापि षष्ठीसमासः। तत्र निर्धारणाभावा 'न्न निर्धारणे' (अष्ट.2-2-10) इत्यनेन न षष्ठीसमासनिषेधः। न च पुरुषसमुदायादेकस्य ईश्वरस्य उत्तमत्वेन पृथक्करणा न्निर्धारणमस्त्येवेति वाच्यम्। समासवाक्यादन्यतो निर्धारण प्रयोजक रूपोपस्थितावेव समासनिषेधात्। नराणां क्षत्रियः शूरतम इत्यप्रयोगात्, नरशूर इति प्रयोगस्त्विष्ट एव। न च नाथ सृजतीत्यादौ तस्येत्यनेन तत्प्रयोजक रूपोपस्थितिः, विधेयस्यैव तत्प्रयोजकत्वात्। तत्पदार्थस्य तु विधेयत्वा ददोषः। एतेन पुरुषोत्तमपदस्य कृष्णत्वविशिष्टे रूढतया तत्प्रयोजक रूपोपस्थिति रित्यपास्तम्। कृष्णत्वविशिष्टस्य योगरूढितया अर्थविशेष्यतया पुरुषाणामुत्तमः कृष्णः इत्यत्र तु कृष्णस्य विधेयत्वेन निर्धारणोपगमात्, पुरुषेभ्य उत्तम इत्यतः स्वेतर पुरुषावृत्ति-उत्तमत्वाश्रय इत्येव योगादतिप्रसङ्गेन रूढिविरहाच्च। एतेन योगार्थस्यैव विशेष्यत्वेन न क्षतिः।

अथ विधेयस्यैव निर्धारणप्रयोजकत्वे किं बीजमिति चेत्, आकलय। गवां कृष्णा संपन्नक्षीरा इत्यादौ निर्धारणषठ्याः तादात्म्यं कृष्णा-संपन्नक्षीर-पदयोः तद्भिन्नं चार्थं तथा च गोतादात्म्यवति कृष्णा संपन्नक्षीरा गोतादात्म्यवति कृष्णान्या संपन्नक्षीरान्या इति वाक्यार्थः। तत्र बहुक्षीरा-तदन्ययोश्च विधेयत्व एवोद्देश्यतावच्छेदकावच्छेदेनाऽन्वयात् पशूनां कृष्णा संपन्न क्षीरा गवामियं संपन्नक्षीरेति न प्रयोगः। एतेन षष्ठ्याः तादात्म्यमेवार्थः। तथा च गोतादात्म्यवत् कृष्णत्वावच्छेदेन संपन्नक्षीरायाः गोतादात्म्यवत्संपन्नक्षीरात्वावच्छेदेन कृष्णाया एवान्वयात्। गवां सास्नावति संपन्नक्षीरा, पशूनां कृष्णा संपन्नक्षीरा इत्यादि अप्रयोग इत्यपास्तम्। विधेयतावच्छेदकावच्छेदेन उद्देश्यत्वस्य अदृष्टचरत्वात्। न चास्तु संपन्नक्षीरादेरेवोद्देश्यत्वं, पूर्वापरत्वाभावात्। क्षत्रियाणां कर्णः प्रचुरतरं ददातीत्यत्र असंभवाच्च धर्मिण्याख्यातस्य लक्षणार्थमुद्देश्यत्वेन बोधायोगात् ददाति सुंदर इत्यबोधात्। न च पचति गच्छति इत्यतः पक्ता गच्छतीत्यादिबोधस्य वैयाकरणैः स्वीकारान्मैवं प्रथमान्तपदोपस्थाप्य एव भावनान्वयस्य नैयायिकैः स्वीकारात् तथैव काव्यादिप्रयोगदर्शनात् जलेषु स्नेहवत् शीतस्पर्शवदिति प्रयोगापत्तेश्च जलतादात्म्यवत् स्नेहवत्वेन व्याप्यता तर्हि क्षत्रियाणां कर्ण इत्यस्यापि अनापत्तेः। तस्मात् कर्णपदस्य कर्णतदन्यौ ददातीत्यस्य दानकृतितदभाव इति पूर्वपदेनाऽन्वयः।

परे तु गोसमुदायादेकदेशस्य कृष्णायाः पृथक्करणं कृष्णेतर गोभेदानुमापकत्व तत्स्वरूप योग्यता निर्धारणम्। तच्च कृष्णस्य इतरभेदव्याप्यत्वं कृष्णेतर

गवाऽवृत्तित्वं पर्यवसितम्। षष्ठ्यर्थे संपन्नक्षीरत्वमेकदेशे व्युत्पत्तिवैचित्र्यात् अन्वेति। कृष्णेतर गोभिन्नत्वमेव वा षष्ठ्यार्थः। पृथक्करणं संपन्नक्षीराया मवच्छेदकावच्छेदेनान्वेति। तेन पदार्थेषु द्रव्यं गुणकर्मान्यत्वविशिष्टवत् तावत्पदार्थेषु जातिमत्सजातिवदित्यादि सूपपदषष्ठ्या स्तादात्म्यार्थतया अवच्छेदकावच्छेदेन भावनान्वयस्यापि स्वीकारात्। तेषु कृष्णा संपन्नक्षीरा गोषु कृष्णा सूक्तान्यतरा संपन्नक्षीरेत्यादि-व्युदासः। षष्ठ्यास्तादात्म्यार्थकतया समुदायतादात्म्यवन्निर्धार्यतावच्छेदकावच्छेदेन निर्धारणप्रयोजक रूपान्वयलाभाय च निर्धार्यं यत्तदितर समुदायाऽवृत्तित्वरूप निर्धार्येतर समुदायभेदानुमितिस्वरूप योग्यत्वरूप पृथक्करणरूपनिर्धारणस्य निर्धारणप्रयोजके प्रयोजकपदार्थैक-देशान्वयलाभाय च निर्धार्य-तदितरवृत्ति धर्मवत्पर समुदायपदोपादानम्। प्रागुक्तान्वयलभयोः किं प्रयोजनमिति चेत्- पार्थिवानां स्नेहवत् शीतस्पर्शवत् जलानां स्नेहवत् शीतस्पर्शवदित्यनयो रयोग्यसंपादनमेव। समुदाय तादात्म्यवन्निर्धार्यतावच्छेदकावच्छेदेन तन्निर्धारणा प्रयोजकरूपभावनान्वय स्वीकारस्य तु गवां कृष्णा शुक्लान्यतरा संपन्नक्षीरा इत्यस्याऽयोग्यता संपादनमिति।

यत्तु यस्मान्निर्धार्यते यश्च निर्धारणहेतुः यश्चैकदेशो निर्धार्यते एतत्त्रितय सन्निधावेव निर्धारणषष्ठी। तत्रैव षष्ठीसमास निषेध इति, तन्न, नरशूरः क्षत्रिय इत्यस्याप्यनापत्तेः। पुरुषोत्तमपदस्य कृष्णत्वविशिष्टे रूढतया पुरुषोत्तम इत्यस्याप्यनापत्तेः। पुरुषोत्तम इत्यस्य योगेन स्वेतरपुरुषाऽवृत्त्युत्तमत्व-

विशिष्टार्थतयाऽनतिप्रसङ्गात्। केवलयौगिकत्वमेवेत्यन्ये। न च पुरुषश्चासौ उत्तमश्चेति कर्मधारयोऽस्तु। उत्तमपुरुष इत्यस्यैव कर्मधारयसंभवात्। जातिविशिष्टवाचकस्य गुणक्रियाविशिष्टवाचकयोगे जातिविशिष्ट वाचक प्राधान्यनियमात्। अन्यत्र त्वनियमः। यथा खञ्जकुब्जः, कुब्जखञ्ज इत्यादौ। यत्तु पुरुषोत्तम इति सप्तमीसमास एवात्रैवेति, तन्न। 'न निर्धारण' (अष्ट.2-2-10) इति निषेध वैयर्थ्यात्, निर्धारणे तादृश प्रयोगस्याऽसाधुत्वज्ञापकतयैव तत्सार्थकत्वात्। सप्तमीसमासेन नरः क्षत्रियः शूरतम इत्यादि प्रयोगापत्तेश्च।

परे तु सप्तमीसमास एवायं, स्वरभेदकषष्ठीसमास निषेधकत्वेन निषेधसाफल्य मित्याहुः। पञ्चमी समास एवात्रेत्यन्ये।।

बहुव्रीहि समासलक्षणम् -

नियमतः समासप्रयुक्त लाक्षणिकोत्तरपदकसमासो बहुव्रीहिः। राजपुरुषादि वारणाय उत्तरपदेति। न च कण्ठेकाल इत्यत्राऽव्याप्तिः। कालपदलक्षणायाः सामासाऽप्रयुक्तत्वादिति वाच्यम्। कालरूपप्रकारे लक्षणाया असत्वेऽपि कालसंबन्धेन लक्षणायास्सत्वात्, वस्तुतो नियमेन समास प्रयुक्तेपि व्यर्थत्वात्। नन्वेवमपि स्थिरमन्यु-रित्यादौ स्थिरमत्सरादा वव्याप्तिः। न चात्र कर्मधारयः। स्वरभेदार्थमपि बहुव्रीहि स्वीकारात्। न च मत्सरपदस्य शुक्लादिपदवत् गुणिनिलक्षणा। गुणिलिङ्गास्तु तद्वत इत्यत्र शुक्लादिमतीत्यर्थात् गुणि शुक्लादिपदं सङ्केतग्रहस्य गुणसङ्केतग्रह प्रयोज्यतया वदिति पदस्य ग्रामादाविव शुक्लादिपदस्य गुणिनि शक्त्यभावो, मत्सरपदस्य निरपेक्ष शक्तिग्राहकयो र्द्वेषतद्वतोरपि शक्तत्वात्।

'मत्सरान्ये शुभेद्वेषे तद्वत्कृपणयो स्त्रिष्वि'ति नानार्थपद्यपाठात्। एतेन मत्सरपदस्यामत्सरशब्दार्थक परामर्शकतया तत्पदघटितत्वं, तेन शक्तिग्राहेऽपि न क्षतिः। मिश्रा अप्येवमिति चेन्न। श्रुतिसिद्धसुखविशेषशक्तिरस्वपदस्य निरूढलक्षणायां नाकादिपर्यायत्ववन्मत्सरपदस्य नानार्थकत्वसंभवात् न चान्यपदार्थप्राधान्यः। विग्रहवाक्यात् यत्पदार्थे यत्प्रतियोगिक संबन्धाश्रयत्वं भासते तत्पदार्थवृत्तिसंबन्धप्रतियोगिनि तत्र लक्षणास्वीकारात्। तथाहि-चित्रा गौर्यस्येति विग्रहवाक्यात् चित्राभिन्ना गौश्च स्वत्वाश्रय इत्यन्वयबोधात्। चित्रगु रित्यादिसमासे गोपदे चित्रगोवृत्तिस्वत्वप्रतियोगिनि लक्षणा। चित्रपदं तात्पर्यग्राहकम्। गोपदे गोस्वामिनि लक्षणा। एकदेशे गवि चित्राभेदान्वयो व्युत्पत्ति वैचित्र्यादित्यन्ये। गोपदादिना शक्यगावादिलक्षणया स्वाम्यादिर्बोध्यते। एकपदयोः परस्परमात्रान्वयो व्युत्पत्तिवैचित्र्यात् इत्यपरे। चित्रापदं चित्रास्वामिपरम्। गोपदं गोस्वामिपरम्। चित्रास्वामी गोस्वामीति बोधः। चित्रात्वेन गोत्वेन एकस्यैव भानम्। व्यक्तिवचनानां सन्निपातपरत्वमिति न्यायात् अतिप्रसङ्ग इति तु तादृशसंबन्धस्य अननुभावकत्वात्, शोभनचित्रगु रित्यादि त्रिपदबहुव्रीहौ असंभवाच्च न युक्तम्। अत्र वा चित्रापदस्य चित्रास्वामिनि लक्षणायां शोभनान्वयानुपपत्तिः। शोभनपदस्य शोभनस्वामिनि लक्षणाया मत्यन्तमनुभवविरोध इति बोध्यम्। आरूढो वानरं यांस्वित्यत्र रुहेरुर्ध्वदेशावच्छिन्न संयोगानुकूला क्रिया, क्तप्रत्ययस्य आश्रयो, द्वितीयायाः आधेयत्वमित्यर्थः। तथा च वृक्षवृत्ति-उपरिदेशावच्छिन्न संयोगानुकूलक्रियाश्रयो वानर इत्यन्वयधीः। आरूढो वानर इति समासे तु आरोहणकत्व वानरसंबन्धि वृक्ष इत्यन्वयधीः। चैत्रदत्तधन इति समासे चैत्रपदस्य चैत्रकर्तृकपदत्वात्

चैत्रकर्तृकदानकर्मकधनसंबन्धिमैत्र इत्यन्वयबोधः। संबन्धः स्वकर्मदानसंप्रदानत्वम्। एवमन्यत्रापि। एषु समानाधिकरण बहुव्रीहिः।

व्यधिकरणबहुव्रीहिस्तु चक्रपाणिरित्यादौ। चक्रं पाणौ यस्येति विग्रहवाक्यात्। यत्संबन्धि पाणिवृत्तिचक्रमित्यन्वयधीः। समासे तु चक्रयुक्त पाणिसंबन्धीति धीः। तद्गुणातद्गुणसंविज्ञान बहुव्रीह्यो र्द्वैविध्यम्। तत्राद्यो भूवादयो धातवः, चैत्रादीन् भोजयेत्यादौ। भूवादिः प्रथमपठितो येषां, चैत्रः आदिः प्रधानो येषामिति विग्रहवाक्यात् भूवाभिन्नः प्रथमपठितो यत्संबन्धि, चैत्राभिन्नः प्रधानो यत्संबन्धीत्यन्वयधीः। समासात्तु भूवाभिन्नं प्रथमपठित संबन्धि, चैत्राभिन्नः प्रधान संबन्धीति धीः, संबन्धः स्वपाठप्राथम्यस्य स्वनिष्ठ प्राधान्यस्य च अवधित्वम्। अत्र भू वाभिन्न प्रथमपठितसंबन्धित्व चैत्राभिन्नप्रधानसंबन्धित्वादिना आदिपदलक्षणा। लक्ष्यतावच्छेदकस्यापि भूवादेः विशेष्यान्वयिनाऽन्वयात् तद्गुणत्वलक्षण मजहत्स्वार्थं च बोध्यम्।

परे तु लम्बकर्णमानयेत्यादौ कर्णादेरप्राधान्यस्यानुभवसिद्धत्वात् अस्तूक्तरीतिः। भूवादय इत्यादौ तु गणपठितत्वनियन्त्रितत्वादिनैव लक्षणाप्रधान्येनैव शक्यलक्षणयो र्विधेयान्वयानुभवात्। काकेभ्यो दधि रक्ष्यतामित्यादाविव तद्गुणत्वादिकं तु लम्बकर्ण भूवादि साधारणं लाक्षणिक पद समभिव्याहुत पदान्यतरशक्ययोर्लक्ष्यान्वयिना अन्वयमात्रादेवेत्याहुः।

आप्तचित्रगुमानयेत्यादौ अत्र। चित्रगोस्वामित्वादिना गवादिपदे लक्षणायां गवादेरन्वयप्रवेशेऽपि न विशेषान्वयिनान्वयो लम्बकर्णमानयेत्यादावन्वय इत्यत्र तु स्वाभाविकमेव तन्त्रमिति दिक्।

क्वचित्प्रथमान्त विग्रहवाक्येपि बहुव्रीहिः। यथा सह पुत्रेणागतः सपुत्रः। सह लोम्ना वर्तते सलोमकः। 'सहैव दशभिः पुत्रैः भारं वहति गर्भभी' रित्यत्र न समासोऽनभिधानात्। एवं केशेषु केशेषु प्रवृत्तं युद्धं केशाकेशि, दण्डैश्च दण्डैश्चयुद्धं प्रवर्तत इति दण्डादण्डीत्यादिरिति दिक्।

यत्र समासघटकान्यत्पदार्थः प्रधानस्सोपि तथा- दक्षिणस्याश्च पूर्वस्याश्च दिशोर्यदन्तरालं सा दक्षिणपूर्वा दिक्। दक्षिणदिक्संबन्धिनी पूर्वादिक्संबन्धिनी-त्यन्वयधीः। द्वौ वा त्रयो वा इत्यादिकमपि बहुव्रीहिभेदः। वस्तुतो द्वित्रास्तिष्ठन्ती-त्यादितो द्वौ वा त्रयो वा तिष्ठन्तीति न संशयः। शब्दस्य तत्राऽसामर्थ्यात् द्वौ त्रयस्तिष्ठन्तीति न निश्चयः। द्वयो स्सत्वे भ्रमत्वापातादिति द्वित्र्यन्यतरे सतीति बोधः। एवं द्वि त्रि वा परिमाणमेषामिति विग्रहवाक्ये द्वित्वत्वान्यतर विशिष्टे लक्षणा। एवं पञ्चषड्ः परिमाणमेषां पञ्चषा इत्यादावपीत्यन्यपदार्थप्राधान्यमिति दिक्।।

द्वन्द्वसमासलक्षणम् -

द्वन्द्वव्यवहार विषयत्वं द्वन्द्वत्वम्। परस्परानन्वितसमस्यमान-निखिल-पदार्थ-बोधक-समासत्वं तत्त्वम्। धवखदिरावित्यादौ खदिरादिपस्य धवखदिर साहित्याश्रये लक्षणाया धवखदिरशक्तिभ्यां वा परस्पराऽनन्वितधवखदिरादि-

बोधकत्वाल्लक्षसङ्गतिः। तथा हि धवखदिरादिपदे धवखदिर साहित्याश्रये लक्षणा। धवत्वेन खदिरत्वेन च उपस्थितौ धवस्वदिरवृत्ति द्वित्वबोधो न स्यात्। किन्तु धवद्वयस्वदिरद्वयबोधस्स्यात्। शक्तेः प्रकृत्यर्थतावच्छेदकव्याप्य-संख्याबोधकत्व-व्युत्पत्तेः। अन्यथा घटावित्यादितो घटादिवृत्ति द्वित्वबोधापत्तेः। साहित्यं चैव क्रियान्वयित्वं धवघटितादिद्वयविशेष्यक बुद्धिविशेष्यत्वं वा तद्व्याप्यं च न धवादिमात्रगत-द्वित्वमित्यदोषः। न च तादृशसाहित्याश्रये द्वन्द्वस्य शक्तिरस्तु। अन्यलभ्ये शक्ते रयोगा-दिति मीमांसकाः। धवत्व खदिरत्वादिनैव बोधः। अन्वयानुपपत्त्यभावा-ल्लक्षणानुपपत्तेः। सुपा प्रकृत्यर्थतावच्छेदकत्वेन प्रकृत्यर्थतावच्छेदकस्य सुपा स्वार्थान्वयित्वस्य वा व्याप्यसंख्या बोध्यत इति धवखदिरवृत्ति द्वित्वमेव तथा द्वयोरेवान्वयित्वात्। अत एव चैत्रो मैत्रश्च गच्छत इत्यादावपि विना सहित्यलक्षणां चैत्रमैत्रवृत्तिद्वित्वबोधः। न चाव्यवहितपूर्वपदस्यैव प्रकृत्यर्थान्वित-स्वर्थबोधकत्वाच्च प्रत्ययानां धवखदिरादि पदार्थ एव विभक्त्यर्थान्वय संभवो न धवादिपदार्थ एवेति वाच्यम्। अव्ययीभावस्य पूर्वपदार्थप्राधान्यात् पूर्वपदस्यैव प्रकृत्यर्थत्ववत् द्वन्द्वस्य पदार्थद्वयप्राधान्यात् पदद्वयस्यैव प्रकृतित्वात् फलबलात् तथैव कल्पनादिति।

स च द्वन्द्वो द्विविधः। इतरेतरयोग-समाहारभेदात्। यत्रावधिप्राधान्यं तत्रेतरेतरयोगः। प्राधान्यं विभक्त्यर्थान्वयित्वम्। अत एव द्विवचनबहुवचने। अत एव धवखदिरौ धवखदिरपलाशा इत्यादौ। यत्र संहतिः प्रधानं तत्र समाहारः। संहतिः साहित्यम्। साहित्यस्य एकवचनमेव। तत्र नपुंसकलिङ्गता अनुशासनात्।

यथा हस्त्यश्वं, पाणिपादमित्यादौ। हस्त्यश्वयोः साहित्य मित्याकारिकान्वयधीः। इत्थं च हस्त्यश्वमानयेत्यादौ हस्त्यश्वे सामानाधिकरण्यसंबन्धेन कर्मत्वान्वय इति प्राञ्चः।

नव्यास्तु हस्त्यश्वमित्यादौ हस्त्यश्वपदे शक्तिभ्यामेव हस्त्यश्वबोधके, न तु साहित्ये लक्षणा। एकवचनं त्वनुशासनबलात्। समाहारसंज्ञा च नदीसंज्ञा-वत्पारिभाषिकी। अत एव हस्त्यश्वमित्यादौ विना द्रव्यपदेलक्षणा-मन्वयबोधः। यदि च हस्त्यश्वं प्रमेयमित्यादौ समाहारबोधोऽनुभवसिद्धः तदा तत्र लक्षणेत्याहुः।

यत्तु यत्र समुच्चयार्थचकारेण प्राधान्यं तत्क्रिया संबन्धो विवक्षितः। धवां छिन्धि, खदिरां छिन्धीत्यादौ। प्राधान्यं च तत्क्रिया भेदो। यत्र चान्वाचयोऽर्थप्रकारेण प्राधान्येन गुणभावेन स विवक्षितो धवं छिन्धि सामार्थ्यात् खदिरं चेत्यादौ। यत्र सपुत्रो गच्छतीत्यादौ पुत्रस्यैकक्रियान्वयित्वेऽपि विशेषणत्वेनैव तदन्वय इत्यत्र द्वन्द्वाभावः। साहित्यलक्षणायामेव निर्वहति तुल्यवदेक क्रियान्वयित्वस्य साहित्यस्य उक्तधर्माभावात्। अत एव चार्थे द्वन्द्व इत्यत्र चार्थस्समुच्चायान्वचयेतरो गृह्यते। अन्वाचय समाहार इतरेतर समुच्चय इत्यर्थचतुष्टयस्य चार्थत्वात्। समाहारः साहित्यम् इत्यरेतरः साहित्यविशिष्टम्। अत एव यत्कर्तव्यं तदनया सहेत्यादावपि पत्न्या सहत्वं न तु साहित्यं पत्याः कथंचिदनुमितिद्वारैव उपयोगेन व्यापारसाम्याभादिति तन्न। चैत्रमैत्रौ स्थितिमतावित्यादि यथासंख्यस्थले एकक्रियान्वयित्वाभावेऽपि द्वन्द्वात्। न च तुल्यवत्सजातीयविजातीयान्वयित्वं साहित्यं वाच्यम्। तादृशसाहित्यलक्षणायां

मानाभावात्। उक्तेषु क्रियासजातीयविवक्षयाप्रधानगुणभावविवक्षया विशेषणत्व-विवक्षया च द्वन्द्वाऽकरणसंभवात्। एतेन विभिन्नदेशकालावच्छेदेन एकक्रियान्व-यित्वरूप साहित्यावच्छिन्ने खदिरादिपदे लक्षणेत्यपास्तम्। तत्र कालभेदविवक्षया द्वन्द्वाकरण संभवादिभिन्नदेशकालावच्छेदेन छिदायामपि धवखदिराभिन्न इत्यादौ द्वन्द्वाच्चेति दिक्।

पर्याययो र्घटकलशावित्यादि द्वन्द्ववारणाय पदार्थतावच्छेदकभेदस्यैव द्वन्द्वनियामकत्वात् नीलघटयोरैक्यं शिवरामयोरभेद इत्यादौ न द्वन्द्वानुपपत्तिः। घटावित्यादौ द्वन्द्वासंभवे तदुपपादक सरूपानुपपत्तिः। द्वन्द्वविशेष एव तदुत्पत्तेरिति वाच्यम्। घटावित्यादौ सरूपैकशेषानङ्गीकारात् एकेनापि घटपदेन नानाघटोपस्थापनसंभवात् सकृदुच्चरित इति नियमाभावात्। अन्यथा पचतीत्यादावपि एकशेषापत्तेः। गङ्गायां घोषमत्स्यौ स्त इत्यनुरोधेन युगपद्वृत्तिविरोधस्याप्यनङ्गीकारात्। केनापि हरिपदेन सिंहत्व विष्णुत्वाभ्यां बोधसंभवात्। हरी इत्यादौ नैकशेषः। हरिहरीत्यादि द्वन्द्वाभावस्तु यदा सारूप्यस्यापि द्वन्द्वनियामकत्वात्। स चैवमेकत्वे च एकत्वानि च एकत्वानि। गुणौ च क्रिये च गुणक्रियाः। गुणक्रियाश्च गुणक्रिये च गुणक्रिया इत्यादौ एकशेषः। गुणदीधिति काव्यप्रकाशाद्युक्तो विरूध्येत। इष्टत्वात्। हंसश्च हंसी च हंसावित्यादौ लिङ्गभेदे एकशेषस्त्वनुशासनबलादिति शाब्दिकाः।

वस्तुतस्तु सरुपाणामेकशेष एकविभक्ताविति सूत्रं एकविभक्तावेव न भेदे एकशेषविधायकतया सार्थकम्। ननु असविभक्तिकस्य द्वन्द्वो न निर्विभक्तिकस्यैव

एकशेष इति नेदं युक्तं द्वन्द्व विषयाप्रवृत्तौ द्वन्द्वापवादताऽयोगात्। प्रातिपदिकोत्तरं विभक्तेरावश्यकत्वेन निर्विभक्ति प्रातिपदिकद्वयाऽसंभवात्। अन्यथा द्वन्द्वादिसमासो निर्विभक्तिकस्यैव स्यात् यथा सादिसादावदन्तत्वाभावादेकदेशसमासत्वाभावेऽपि विभक्तिलोप, स्तद्धितान्त एवेति दीधितौ विद्योतत इत्यस्तां विस्तरः।

अव्ययीभावलक्षणम्

नियमतस्सर्वपदार्थ विशेष्यक बोधजनकसमासत्व मव्ययीभावत्वम्। अब्राह्मणः, अर्धपिप्पलीत्यादि वारणाय नियमत इति। उपकुम्भम् निर्मक्षिकमित्यादौ कुम्भपदस्य कुम्भादिसंबन्धिनि लक्षणया कुम्भादिसंबन्धि समीपं, मक्षिकादिप्रतियोगिकाऽभाव इत्यादिधीः। चन्द्र इव मुखं भूतलं घटवत् इत्यादाविव चन्द्रादेर्भावनाप्यन्वयात्। अव्ययनिपातातिरिक्तप्रातिपदिकार्थस्य अभेदेनाऽन्वयात् कुम्भादिपदवाच्यस्यैव सामीप्यादौ भेदान्वय इति तु नव्याः। न च उन्मत्तगङ्ग-मित्यादौ अन्यपदप्राधान्ये अव्याप्तिः। अव्ययीभावानुशिष्ट नपुंसकलिङ्गत्वार्थकं कुम्भकारः क्षीरपायी खट्वशायीत्याद्युपपदसमासे कुम्भादिपदे लक्षणया कुम्भविषयक ज्ञानकर्मकखट्वाधिकरणकादिपरम्। नामार्थ धात्वर्थयोर्भेदेनाऽन्वयस्य अव्युत्पन्नत्वात्। विरूपैकशेषे पितरा वित्यादौ तु तप्तमातपमिति स्मरणात् जनकशरीरत्वेवा। पितृपदलक्षणया वा मातापित्रोरन्वयधीः। पितृपदं शक्त्या लक्षणया वा मातुर्बोधकमित्यन्ये। (एवं च सुर पचते पत्नीजनकशः रत्वादिना प्रातिस्विकरूपेण वा बोधः।?) सरूपैकशेषे दम्पतीपूजाप्रकरणे ब्राह्मणमानयेत्यादौ ब्राह्मणपदस्मरणात् ब्राह्मणत्वेनैव वा स्त्रीपुरुषब्राह्मणयोर्बोधः। पुंस्त्वयोग्यत्वात्

स्त्रियां नान्वेति। विभक्तिरेव वा लक्षणया स्त्रीत्वस्यापि बोधिका। ब्राह्मणपदमेव वा शक्त्या ब्राह्मणत्वेन लक्षणया ब्राह्मणीत्वेन बोधकम्। एवं हरावित्यादावपि शिवौ नमस्कुर्यादिति (नमो) शिवपदं लक्षणया शिवदुर्गान्यतरत्वेन किं वा शक्त्या शिवत्वेन लक्षणया दुर्गात्वेन बोधकम्। एव-मन्यत्राप्यूह्यमिति गतिः।

श्री श्री समासवादस्समाप्तः।।

श्रीरामानुजाय नमः।

Samasavada

By
Nyaya Panchanana
Sriman Jayarama

Chief Editor :
Prof. Sripada Subrahmanyam

Editor :
Prof. R.V. Ramakrishna Sastry

A.P. Govt. Oriental Manuscripts Library
and Research Institute
Hyderabad - 500 007.
2012